श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीरङ्गरामानुजमहादेशिकैः (श्रीमुष्णं आण्डवन्) अनुगृहीतं

# ॥ श्री विष्णुरक्षा स्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness* *śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री विष्णुरक्षा स्तोत्रम् ॥

हेयातीतो मेयातीतो मायातीतो ज्ञेयातीतः।
गेयातीतो ध्येयातीतः पायाद्विष्णुर्जायोपेतः॥ 1 ॥

वेदातीतो देवातीतो योगातीतो यागातीतः।
शर्वातीत स्सर्वातीतः पायाद्विष्णुर्जायोपेतः॥ 2 ॥

नादातीतो बोधातीतो मेधातीतो वादातीतः।
भावातीतो भोगातीतः पायाद्विष्णुर्जायोपेतः॥ 3 ॥

मानातीतो गानातीतो ज्ञानातीतो ध्यानातीतः।
नानातीतो भानातीतः पायाद्विष्णुर्जायोपेतः॥ 4 ॥

ब्रह्माधीशो भर्गाधीशो पाकारीशः सर्वाधीशः।
देवाधीशो देहाधीशः पायाद्विष्णुर्जायोपेतः॥ 5 ॥

अन्नेकोशे प्राणेकोशे स्वान्तेकोशे ज्ञानेकोशे।
नन्देकोशे शायीमायी पायाद्विष्णुर्जायोपेतः॥ 6 ॥

मन्त्राधीशस्तन्त्राधीशो यन्त्राधीशः कालाधीशः।
ज्वालाधीशः सूर्याधीशः पायाद्विष्णुर्जायोपेतः॥ 7 ॥

भक्त्यागम्यो विद्यागम्यो मूर्त्यारम्यः कीर्त्यारम्यः।
भक्ते भृत्यः भावेमर्त्यः पायाद्विष्णुर्जायोपेतः॥ 8 ॥

जीवैर्भारे न्यस्ते धीरैः कामी स्वामी कम्पा युक्तः।
औत्सुक्यात्तं सोढुं यत्तः पायाद्विष्णुर्जायोपेतः॥ 9 ॥

क्षीरे नीरे नद्यास्तीरे मध्ये मेध्ये वाद्ये खाद्ये।
वीरे वादे वासी भासी पायाद्विष्णुर्जायोपेतः॥ **10** ॥

अग्नौ सूर्ये आर्ये कार्ये वाते मेघे जाते वर्षे।
हर्षेऽघाते नद्यां तिष्ठन् पायाद्विष्णुर्जायोपेतः॥ **11** ॥

गोभिर्गोपैर्गोपी ग्रामैः गोत्राद्वृष्टे स्नातुं वीतः।
भक्ते भक्ते भक्तो रक्तः पायाद्विष्णुर्जायोपेतः॥ **12** ॥

ज्योत्स्नारामे यम्याः कुञ्जे रासे लास्ये हास्ये दास्ये।
रङ्क्तः पथ्या रन्तुं सक्तः पायाद्विष्णुर्जायोपेतः॥ **13** ॥

श्रावं श्रावं वेणू नादं भावे भावं याचे सत्यम्।
इत्याचष्टे गोपीश्यामा पायाद्विष्णुर्जायोपेतः॥ **14** ॥

नित्यप्रीतो मुक्तप्रीतः सक्तप्रीतः सत्यप्रीतः।
भक्तिप्रीतो मुक्तिप्रीतः पायाद्विष्णुर्जायोपेतः॥ **15** ॥

कालाधारो लोकाधारो वेलाधारो मूलाधारः।
भूताधारस्सर्वाधारः पायाद्विष्णुर्जायोपेतः॥ **16** ॥

श्रुत्याधारस्मृत्याधारो वृत्याधारो भक्त्याधारः।
नत्याधारो मुक्त्याधारः पायाद्विष्णुर्जायोपेतः॥ **17** ॥

हेमातीतः प्रेमातीतो व्योमातीतो भूमातीतः।
वीशं कीशं मेशो ईष्टे पायाद्विष्णुर्जायोपेतः॥ **18** ॥

चित्तेऽचित्ते चित्ते रूपं ध्यात्वा सोहं धूत्वा मोहम्।
त्वामेवान्ते सन्तं याचे पायाद्विष्णुर्जायोपेतः॥ **19** ॥

कीर्त्या धृत्या दिष्ट्यासृष्टां नीत्यारीत्या प्रीत्यापुष्टाम्।
विद्युन्मालां नत्याजुष्टां सेवेद्योतं पायाद्विष्णुः ॥ **20** ॥

॥ इति श्री विष्णुरक्षा स्तोत्रं समाप्तम् ॥